R
S
V
L
10430

Q
2.A1A6
N58
10430

Kendriya Sanskrit Vidyapeeth

16430

म्यदः ।


॥

C

RC

स्मृतोऽपि यः सर्व सुमंगलप्रदः, शिरः प्रसर्पत्सुरसारिणी स्यदः ।
अङ्कस्थ हेरम्ब षडास्य बालकः, सुखाय भूयाद्धिमवत्सुतावरः ॥

शिव शतकम्



रचयिता
श्री बालकृष्ण भट्ट साहित्याचार्य

N55

ॐ ॐ नमः शिवाय ॐ

शिवस्तवक शतकम्

(पुनर्मुद्रणादि सर्वेऽधिकाराः स्वायत्तीकृताः)

रचयिता तथा प्रकाशकः

वि० भू०, दर्शन केशरी, कविरत्न

पं० श्री बालकृष्ण भट्ट शास्त्री,

साहित्याचार्य, काव्यतीर्थादि विविध विरुद विभूषितः, टिहरी राजकीय संस्कृत महाविद्यालय प्रधानाचार्यश्च ।

प्रकाशक—

मैनेजर, बाल पुस्तकालय

मु० जाखौली, पो० जाखाल भरदार

(टिहरी गढ़वाल)

प्रथमवार]

० प्रतयः]

१९५८ ई०

[



10430
N58

❀ ॐ नमः शिवाय ❀

आचार्य—श्रीमद्बालकृष्ण भट्ट शास्त्रिकृत—

शिव स्तवक शतकम्

उत्तुङ्ग शृङ्ग हिमशैल विराजमानं,
गङ्गाधरं सकल मङ्गल मञ्जुलाङ्गम्।
नन्दीश्वरं प्रमथ नाथ मनादि देवं,
तं पार्वतीश्वरमहं प्रणमामि नित्यम् ॥१॥
शम्भो ! त्वदीय शिवं नाम महत्व मुच्चै—
र्वाग्देवतापि जनता परिताप हारम्।
धर्मार्थ काम परमोच्च पद प्रदं सा,
स्तोतुं यथाविधि किमु क्षमते मतेह ॥२॥
ब्रह्मादयोऽप्यखिल शक्ति समृद्धि वृद्धाः,
शक्ता नचेत्तव गुण स्तवनं विधातुम्।
तान्-स्तोतु मत्र शतकेन कथं प्रवृत्तः,
हंहो ? महेश ! हृदि मेऽस्ति महान् वितर्कः ॥३॥
यान् यस्य सद्गुण गणान् श्रुतयः शिरोभिः,
गायन्ति रुद्धगतयः प्रणयेन भीताः।
तां स्ते प्रभो कथमहोऽत्र महा महिम्नः,
स्तोतुं क्षमोहमिति मे कुरु दृष्टिपातम् ॥४॥
हे विश्वमङ्गल ! महेश्वर ! हे कृपालो !
हे विश्वनाथ ! शिव ! शङ्कर ! चन्द्रमौले।
बद्धाञ्जलेः स्तुति मते र्नतमस्तकस्य,
[illegible]म्फारये र्मम गिरां पटुतां स्तवाय ॥५॥

R2:4146 (?)
N58
SANSKRIT VIDYA PEETHAM
10430
TIRUPATI.

हीनोऽस्मि सद्गुणगुणैः पुरुषाधमोऽस्मि,
दीनोऽस्मि दुष्कृतयुतोऽस्मि जितोऽस्मि दुःखैः।
तत्त्वं महेश ! भय मोचनतोऽधुनेह,
मां पाहि पाहि कृपया शरणं त्वमेव ॥६॥

भो भो महेश! मम वाचमिमां जुषस्व,
संयुक्त पाणि युगलस्य पदे नतस्य।
दूरं निरस्य सकलान् दुरितान्तरायान्,
तत्त्वं प्रसीद कृपया बहुशो नमस्ते ॥७॥

सामर्थ्य मीश्वरगतं कथमस्मि शक्तो,
वक्तुं गुणांस्तव विभो! हि महद्विचित्रम्।
तत्किं विधेय मधुना वद विश्वबन्धो,
लोकत्रयी परगुरुः परमेश्वर स्त्वम् ॥८॥

आजीवनं सुकृत मत्र कृतं न किञ्चित्,
नैवाधुनापि पुनरेव विभो तदाशा।
तस्मात्त्वमस्व कृपया करुणाकरस्त्वं,
कं वाक्वयामि शरणं शिवदं त्वदन्यम् ॥९॥

यं वेदगी र्गदति शुद्धमपाप विद्धं,
अव्यक्तमव्रण मकाय मरूप मेकम्।
अस्नाविरं मतिपरं तमहं भवन्तं,
रूपेण केन कलयामि वद त्वमेव ॥१०॥

राजत्कला निधिकला कलितोत्तमाङ्गः,
मातङ्ग चर्मवसनः कृत पाश भङ्गः।
भूषायिनाऽखिल भुजङ्ग ललामसङ्गः,
गङ्गाधरो दिशतु मङ्गलमीश्वरो नः ॥११॥

भूतेश! भूतिकर भीतिहर प्रसीद,
स्थाणो महेश शशि भूषण शर्व शम्भोः

नामैव ते भव महाब्धि निमज्जतां सद्-
आलम्बनं निगदितं परमं जनानाम् ॥१२॥

स्तुत्यं पुराण पुरुषं करुणानिधानं,
धीनायकं सकल मङ्गल सन्निधानम् ।
भक्त्याप्रणम्य परया परमेश्वरं त्वां,
याचेऽहमत्र भगवन् ! तव पादभक्तिम् ॥१३॥

नानाविधाधि शत दुःख निवारणाय,
स्वास्थ्य प्रदाय पर निर्वृतिकारणाय ।
कामादि शत्रुनिवहस्य विनाशनाय,
याचेऽहमद्य भगवन् ! व्रतिनां व्रताय ॥१४॥

विद्या मवद्य रहितां सकला मलर्ध्वीं,
शक्तिं प्रसक्तिमखिलां विलसत्कवित्वम् ।
कीर्तिं सतीं विजित शारद पूर्णचन्द्रां,
विस्तारयाऽऽशु कृपया गिरिजेश ! मह्यम् ॥१५॥

वामाङ्ग संस्थित शिवा कृत केलि रागं,
जातानुराग रसिकं सगुणं स्वतन्त्रम् ।
अन्योन्य दर्शन सुहर्षित पार्श्व वर्त्ति—
क्रीडत्पडानन गजानन मोदमानम् ॥१६॥

भालेन चन्द्र शकलं गरलं गलेन,
व्यालालि माल्य मुरसा च करेण शूलम् ।
भस्मावलेप मनिशं वपुषादधानं
तं नौमि साञ्जलिरहं भव भूतनाथम् ॥१७॥

पश्यन्ति योग परिपूत दृशा हृदन्ते,
अस्तं गतान्य विषया यमितः समाधौ ।
सच्चिद्-घनं जनिमता मजनिप्रदं सः,
ज्योतिर्मतिं वितनुता मतिमङ्गलां नः ॥१८॥

हे पार्वतीश ! वलयीकृत नागराज !
हे स्फालनेत्र डमरूधर ! भालचन्द्र !
चेन्नृत्यसेव यदि ते भगवन्नभीष्टं,
चित्ताङ्गणे मम तदा नट ! नृत्य नित्यम् ॥१९॥

यस्य प्रभूत महस स्तव देव लीला,
मायामयी भुवन मोहन ताण्डवीया ।
डिम्-डिम्-रणड्डमरु सुन्दर सन्निवेषा,
लोकोत्तरा जयतु सा शिव मातनोतु ॥२०॥

तिष्ठन् व्रजंश्च मनसा परमेश्वरस्य,
लोक त्रयेश ! भवसागर तारणस्य ।
शान्ताद्वितीय निगमागम संस्तुतस्य,
सर्वत्र ते चरण चिन्तन माचरेयम् ॥२१॥

मिथ्यार्थतां नहि ममैतु दिनादि चर्या,
नोवाऽनृतार्थ रचने वचसां विलासः ।
नाना विधाधि शतदुःख निवारणाय,
यत्नः सदास्तु तव चिन्तन चर्चितोऽयम् ॥२२॥

मन्ये त्वदीय गुणवर्णनमेव ! यस्मात्,
पापानि नाशयति शङ्कर ! चोपतापान् ।
तस्माद्यथा मति सदेह तदेव देव !
स्वामिन् ! सुदैव सहितेन जनेन कार्यम् ॥२३॥

नाथ ! त्वदीय पदपद्म समर्चनाद्वै,
कैवल्य कीर्तिवसु संलभते मनुष्यः ।
स्वान्तश्च निर्मलतरं विदधात्यहोऽनु—
कम्पां कुरुष्व करुणामय मय्यनाथे ॥२४॥

मत्कष्ट खण्डन पटुर्नहि पण्डितोऽन्यः,
चन्द्रार्ध खण्ड शुभ मण्डन ! विष्टपेषु ।

पापान्निवारय विधेहि शमे मतिं मे,
सत्यात्मिकां गुरुतरां मयिधेहि मेधाम् ॥२५॥

ज्ञातंविभो जगति दैहिक सौख्यमात्रे
कार्या न तृप्ति रितिकेन चिदप्यमुस्मिन् ।
देवेयतो भवति वाङ् मनसो रतीते
क्रीडैव शाश्वत सुखं कुरुते जनानाम् ॥२६॥

आनन्द कानन गुहाश्रित मद्वितीयं,
स्वीय प्रभा पटल पूरित विश्वकोषम् ।
दोषं निरस्य विहिता खिल तापमोषं
वन्दे सदैव तमरोष मिहाशुतोषम् ॥२७॥

पृथ्वी रथस्तरणि चन्द्रमसौ रथाङ्गे,
हेमाचलं च कथितो ननु केतु दण्डः ।
धाता तु सारथि रथ श्रुतय स्तुरङ्गाः
सोऽयं रथी बिजयते जगदादिदेवः ॥२८॥

एतावदेव फलमस्य जनस्य लब्धुं
वाञ्छाऽतिरिक्त विषयेषु मनोनलग्नम् ।
यत्त्वत्पदाम्बुज नितान्त सुखान्तचिन्ता,
पीयूषपान निरतो मुदितो भवेयम् ॥२९॥

मन्दाकिनी गगन चुम्बि महोर्मिमाला
लीला विगुण्ठित जटावलि मञ्जु जूटः ।
भस्मप्रभा विजित चन्द्रमरी चिरेखः,
ईशः सदा जयतु भालविभासितेन्दुः ॥३०॥

सर्वोत्तरं भुवन नायक मादिदेवं,
ब्रह्मादि सर्व सुर वन्दित पादपद्मम् ।
श्रीशंकरं वृषभ वाहन मम्बिकेशं,
रेरे मनस्तमनिशं भज विश्वनाथम् ॥३१॥

यत्तेजसा शशिरवी सगणौ चकास्तः,
यत्तेजसा दहति सोऽपिच वह्निदेवः ।
यत्तेजसा चलति जीवति वक्ति जीवः,
तेजो निधिं तमनिशं हृदि नौमि नित्यम् ॥३२॥

यो निर्गुणोऽपि गुणवान् गदितोऽथ काले,
स्वेच्छा वशेन बहुरूप धरोऽस्त्यजोऽपि ।
मायावशेन तनुते विविधां च लीलां,
रेरे मनस्तम निशं भज पार्वतीशम् ॥३३॥

पापात्मनां निरयिणां गति मादधानं,
नीचाश्रितं यदि न द्रक्ष्यसि पापनाशिन् !
हा हा नराधमजनः स तदा शिवं त्वां,
मुक्त्वा पतिष्यति विभो नरके सखेदम् ॥३४॥

त्वन्मञ्जुलां शिव शुभां स्तवनीय मूर्तिं,
स्तौति प्रभो यदि सकृन्मनुजोऽत्र भक्त्या ।
संसार भीति रहितो भवति प्रसन्नः,
स्मृत्वेति हृष्यति मनः शतशो नमस्ते ॥३५॥

मित्रं त्वमेव मम शर्व ! विपत्प्रपाते,
माता त्वमेव सदयाऽमृत पाणिरीश !
वित्तं त्वमेव विगतक्षय भीति बाधं,
सर्वं त्वमेव मम शङ्कर ! सर्वदेह ॥३६॥

निःशेष विष्टपतलेऽखिल वन्दनीयः,
मान्यस्त्वमेव भगवन् स्तवनीय एकः ।
विश्वप्रभो कलुष सम्भव कष्टहारी,
सत्यं त्वमेव शिवदोऽपिच पापहारी ॥३७॥

ब्रह्माण्ड भाण्ड लय नाटन ताण्डवींया,
लीलास्ति भक्त जनताऽभयदान दक्षा ।

सा ते महामहिम शालिन ईश मेध्या,
दूरं निरस्य दुरितं मुदमा तनोतु ॥३८॥
काशीपतिं पशुपतिं जगदेक वन्द्यं,
सौम्यं च सौम्यपुर नायक मम्बिकेशम् ।
कैलासनाथ ममलं गिरिजा समेतं,
रेरे मन स्तमनिशं भज विश्वनाथम् ॥३९॥
या उत्तमाङ्ग विहरत्सुर निम्नगायाः,
शैवाल जाल शरणिं दधते विकीर्णाः ।
देवस्य नोऽत्र वितरन्तु पिनाक पाणेः,
शश्वद्भवानि भविकानि जटाच्छटा स्ताः ॥४०॥
विभ्राजमान सबलित्रय वल्गवनैक—
ब्रह्माण्ड धारण चणोदर दीप्यमानम् ।
क्रान्तं नितान्त मधिक स्फटिकावदातं,
वन्दे चिताभसित भासित सर्व देहम् ॥४१॥
देष त्रिलोचन मनोरम नीतिरीते,
चण्ड स्वशासन वशीकृत सर्व लोकम् ।
रामाकटाक्ष परमायुध मुग्र वेगं,
त्वं शम्बरारि मदहो दहनात्मनाऽक्ष्णा ॥४२॥
संसार दुःख दहना दति दुःखितोऽहं,
अत्रागतोऽस्मि तव छत्रतले दयालो ।
विश्वेश विश्व भय मोचनतः स्वदासं,
मां पाहि पाहि कृपया परमेश्वर स्त्वम् ॥४३॥
संस्तूयसे हिमवतः शिखरेषु सिद्धैः,
जेगीयसे जयर वै रपि किन्नराद्यैः ।
नृत्य प्रचार चतुराऽमर सुन्दरीभिः,
धन्यस्त्व मुत्क नयनैः परिपीयसेऽसि ॥४४॥

ज्योति र्मयानि तव तानि सुनिर्मलानि,
लिङ्गानि संस्मरति यो हृदयेत्र भक्त्या।
निर्धूत पापततिकः स भवन् मनस्वी,
शम्भो ! सदेह लभते सकलं शिवं हि ॥४५॥

देहाभिमान विधुरोऽभिहितो न जीवः,
देहप्रियः सपदि कामयते न मुक्तिम्।
मुक्तिप्रदोऽसि भगवन् ! स्मृतिमात्र तुष्टः,
तत्त्वं प्रसीद कृपया मयि हे महेश ! ॥४६॥

नाथ ! भ्रमामि सततं तव विश्व चक्रे,
चित्तञ्च नैव विषमात्प्रशमं ममैति।
मिथ्यासु नित्य मभिमान महं ममेति,
कातात्विकीह घटनेति मतौ न भाति ॥४७॥

भीतिर्न मे पशुपतेऽणु समापि मृत्योः,
ख्याप्तिः सतो जनिमतोऽस्ति हितेन सिद्धा।
याचेऽहमद्य भगवन् प्रणिपत्य पादं,
पादाम्बुज स्मृति रपैतु न मे मनस्तः ॥४८॥

त्वत्प्रार्थना कृतमनाः शिव पुण्यहीनः,
त्रैलोक्यनाथ ! पुरतोऽस्मि तवैष दीनः।
भग्नः प्रभो यदि ममाल्प मनोरथोऽपि—
त्वां किं वदिष्यति जगत्प्रणतं जनौघः ॥४९॥

ये धूप दीप कुसुमै रपि विल्व पत्रैः,
त्वा मर्चयन्ति जगदीश ! नरोऽत्र भक्त्या।
ते सम्प्रतीर्य भव सागर मश्रमं तत्,
तद्दुर्लभं परपदं किमु नो लभन्ते ॥५०॥

यद्भावितं तदपि भूत मनेन किं वा,
सर्वं प्रयातु कमनीय फलं गुणानाम्।

Q2:4146
N58 (६)
TIRUPATI
10430
LIBRARY

शेषे स्पृहोचित विलाप कलाप कस्ये—
दं धूलि धूमर सुमूर्ति निरीक्षणं स्यात् ॥५१॥

नो किं महेश्वर ! भवेन्मयि सानुकम्पा,
कम्पायतेऽयमपि ते पदपांशु पूजाम् ।
श्रद्धाऽविरुद्ध कटिबद्धतया निदध्यात्,
सम्पादिताऽस्य सुमतिः खलु ते प्रसादात् ॥५२॥

त्वत्प्रार्थनेऽपि यदि हन्त मदीय दुःखं,
नो याति तर्हि तव नाम विचिन्तकानाम् ।
नश्ये दहार्य सुवृहद्भव दुःख मित्थं,
स्यात्प्रत्ययो हृदि कथं भगवन् ! जनानाम् ॥५३॥

नीतो विनीत मनसा य उदार भावं,
स्वीय प्रकर्ष सुकृते रुपलब्ध सौख्याः ।
तेषां कृते यदि दया किमु ते नचाब्धौ,
पर्जन्य जन्य जल जाल निपातचिन्त्यम् ॥५४॥

एक स्त्वमेव भगवन्निखिलाघहारी,
स्वानन्द कन्द करुणा वरुणालयश्च ।
दूरं व्यपोहसि महाघचयं जनानां,
त्वद्भावनार्जन विधौविहित श्रमाणाम् ॥५५॥

यच्छम्बराऽसुर वरान्-प्रबल प्रमत्तान्,
दैत्यानुदग्र मनस त्रिपुरान्धकादीन् ।
गौरीश्वर स्मरहर प्रकराल काल,
कालानल ज्वलित शूलधरोऽवधीस्त्वम् ॥५६॥

यः शक्ति रूप मवधार्य च चण्ड मुण्डौ,
यः कैटभं मधु समन्वित माजघान ।
देव्यात्मनैव हत सैरिभशुम्भ मुख्यं
शक्रादि संस्तुतमहं तमिहाऽऽनतोऽस्मि ॥५७॥

अर्थं ददाति भजमान जनाय भूम्ना,
कौपीन मात्र परिवेष्टित देहभागः।
यस्य प्रशासन वशं भुवनत्रयञ्च,
तं नौमि साञ्जलिरहं भुवनैकनाथम् ॥५८॥

कोटी-दिवाकर समान प्रभाभियुक्तं,
सार्वत्रिकाऽनुपमकान्ति रितोऽभिजाता।
तज्जीवनेन्दु प्रलयानल जन्मधाम—
भालं तवास्तु विमलं भवमङ्गलाय ॥५९॥

मूर्ध्नि स्थिता सुरसरित्सुधयैव पूर्णा,
पापाऽपहाऽस्ति जगतीह तवाश्रयेण।
तेऽद्य स्पृशादपि पराघहरा भवेत्सा,
तत्किं ममाघ हरणे न भवेत्पदं ते ॥६०॥

अध्यात्म दृष्टि परिकल्पित सत्व योगाद्,
अन्तर्नियम्य यमिनः प्रकृतेः पृथग्यम्।
वाचामगोचरमतीन्द्रिय मद्वयाख्यं,
ज्योति विदुस्तमनिशं परमं भजेऽहम् ॥६१॥

संश्रोतृकं न भवति श्रुति गोचरं यत्,
सन्दर्शकं च नहि दृष्टि पथं प्रयाति।
बोद्धृ स्वयं नमति बोध्यमहो यदीयं,
रूपं किमप्यहरहो हृदि भावयामि ॥६२॥

भूत प्रपञ्च जनकोऽथ न जन्म यस्य
योऽनन्तशक्ति पुरुषः प्रकृतिश्च साक्षात्।
सन्निर्गुणोऽपि सगुणः करण क्रियातः,
तं नैक रूप विभवं हृदि भावयामि ॥६३॥

सृष्ट्वा चराचरमिदं जगदात्म शक्त्या,
सत्वं रजस्तम इति त्रिगुणाश्रयेण।

एकोऽप्यनेक इव यो भवति त्रिनेत्रः,
श्रीशाब्जयोनि भवरूप विवर्त वृत्या ॥६४॥

भूभृन्नदी नद समुद्र जडाजडेषु,
सर्वात्मना परिगतं सगुणागुणत्वम् ।
दूरं गवेषयितु मज्ञतरा भ्रमन्ति,
मुग्धेव कुक्षिग सुतं त्वननुस्मरन्ति ॥६५॥

न त्वं पुमान् महित सन्महिन्न च स्त्री,
क्लीवश्च नो न च शिशुर्न युवान वृद्धः ।
भूतो न भासितमहो नच वर्तमानो—
भावी न नोत्तमतमो नसमोऽधमो नो ॥६६॥

साक्षा च्छिव स्त्वमसि वीतशिवोऽहमस्मि,
भूताधिप स्त्वमसि भूतमयोऽहमस्मि ।
मृत्युञ्जय स्त्वमसि मृत्यु जितोऽहमस्मि,
विश्वेश्वर स्त्वमसि विश्व मितोऽहमस्मि ॥६७॥

न त्वत्समः सदयतासहितोऽस्ति लोके,
नो मत्समः सदयतारहितोऽस्ति लोके ।
न त्वत्समः परम सक्षमताश्रयोऽस्ति,
नो मत्समः समधमाक्षमतालयोऽस्ति ॥६८॥

कर्त्तः ! प्रपालक ! सदा जगतः प्रहर्तः !
भक्त प्रसक्त सुर नायक पार्वतीश !
लग्नं गुणालि वचने रचने स्तवस्य,
आयाहि पाहि शिव ! सेवक मद्य सद्यः ॥६९॥

यो भक्त दुःख दलन प्रवणो दयालुः,
कैलास वास नियतं व्यसनं विधाय ।
कैवल्य मुक्ति पददायी महा महेशः,
रे रे मन स्तमनिशं भज विश्वनाथम् ॥७०॥

यस्याज्ञया द्विजपती रवि रित्युभौ च,
स्व स्वोदयास्त करणा चरणा नुषक्तौ।
संवत्सरर्तु जलधि प्रभृतिर्न सीम्नः,
पारे परं तमनिशं सततं भजेऽहम् ॥७१॥

किञ्चैक मूर्ति रुतवा त्वमथाष्ट मूर्तिः,
जाने नवा किमपि य द्भ्रश मत्र शङ्की।
शेषोऽपि संशय मितो महिमाभिविज्ञः,
संशेरते जगति के न जना स्तदत्र ॥७२॥

द्वन्द्वानि यानि जगतीह शरीर जातं,
खिन्नं परं विदधते जगदीश नित्यम्।
सोढुं क्षमो भवति तानि यतोजनोऽयं,
त त्तादृशीं कुरु कृपां मयिदीन बन्धो ॥७३॥

अज्ञानियानि मुनिभिः प्रतिपादितानि,
कारुण्य वारिधिभि रत्र जगद्धितानि।
योगस्य तैरनुदिनं मनसो विशुद्धिं,
कृत्वा तथा कुरु लभेय यथा भवन्तम् ॥७४॥

शक्त्या त्वमीश ! शतके जगदम्बिकायाः,
आराधितोऽसि ऋण वन्धन मुक्ति हेतोः।
सा याचना सफलिता तनयाऽर्थिनोमे,
तत्ते दयामय ! दया महती मयीह ॥७५॥

यः पूर्वजन्म कृतपुण्यचयोदयेना—
ऽत्रै कान्ततः कृतमतिर्हिं नमः शिवाय।
भक्त्येति नाम जपति प्रणवेन युक्तं,
वन्द्यः स एव लभते परमं पदं ते ॥७६॥

गङ्गा तरङ्ग हिमशीकरजै र्जलौघैः,
प्रक्षालितोऽनवरतं तव केश पाशः।

विद्याधर प्रमुख किन्नर गीत कीर्तिः,
सत्वं प्रसीद जगदीश नमो नमस्ते ॥७७॥

आस्तां भतिर्यति मनस्सु विभूतिरूपा,
साक्षात्पद ग्रहण कारण कार्य रूपा।
वैभे विभातु वदने हृदयेऽस्मदीये,
ईशः सदा प्रमथनाथ इति प्रसिद्धः ॥७८॥

आयातु यातु जननी जठर प्रसङ्गः,
तेनास्य किं कलित कोमल पाद वृत्तिः।
सेवापरस्तव पदाम्बुजयो र्यदिस्यां,
मन्त्रं जपन् सप्रणवं हि नमः शिवाय ॥७९॥

हा हन्त हन्त कलिना कवली कृतोऽद्य,
धर्मः सनातन इतीहस वैदिक स्ते।
दृप्तै र्विकर्म निरतैः परितोऽवरुद्धः,
तत्किं न रक्षसि महेश! वृषध्वज स्वम् ॥८०॥

नो दृश्यतेऽद्यतव वैदिक मन्त्र पाठः,
नो क्वापि यज्ञ जप पूजन कर्म निष्ठा।
सर्वत्र नः शुचिहराऽत्र गुरुण्ड शिक्षा,
तत्सभ्य तैव च महेश! समेधतेऽहो ॥८१॥

कालेऽधुना व्रजति निम्न पदंद्विजातिः,
नष्टा स्वधर्म सरणिः खलु भारतीया।
यद्मादि रोग परिवृद्धि रतो नितान्तं,
मर्त्यस्तथापि न विमुञ्चति नेत्र मुद्राम् ॥८२॥

विद्यालयेषु च विधान सभासु राष्ट्र—
संस्थासु चेह न पदं लभतेऽद्य धर्मः।
लोका गतानु गतिकाः स्वहिता नभिज्ञाः,
तत्पाहि पाहि कृपया परमेश्वर स्वम् ॥८३॥

श्रौतानि च स्मृतिवचस्सु निरूपितानि,
त्वच्छासनानि कुधियोऽद्य विहेलयन्ति।
आज्ञानुगा स्तव भवन्ति च दण्ड नीया,
इत्थं व्यतिक्रममहो सहसे कथं नु ॥८४॥

हिन्दू समाज विहित क्रय विक्रयाणां,
वैधव्य दुःख परि मर्दित सुन्दरीणाम्।
हा हन्त हन्त कुदशां प्रविलोक्य तासां,
दीर्णा धरास्ति करुणाकर ! कश्च यत्नः ॥८५॥

तांस्ता नपास्त यम दण्ड भयान् सुदण्ड्यान्,
वेदादि शास्त्र मुनिवाक्य विवेक हीनान्।
गृध्रा यमस्य निजतुण्ड प्रचण्ड कोट्या,
नूनं प्रविद्ध हृदया नदया विदध्युः ॥८६॥

हंहो महेश ! विततता तव भारतेऽद्य,
सा दुःसहा परकृता परतन्त्रताऽत्र।
तद्द्राक् त्वदीय कृपया भरतावनीयं,
भूया त्स्वतन्त्र जनतन्त्रतयाऽवलिप्ता ॥८७॥
या दिव्य वागमृत निर्झरणीव हृद्या,
वेदात्मिका तदुपबृंहण शास्त्र रूपा।
या भारतीय शुचि संस्कृति धर्ममूला,
सा भारती सुरगवी जयतात्पुराणी ॥८८॥
हिन्दुत्व संस्कृति रहो यदधीन सर्वा,
या वा त्वदीय डमरू स्वन कर्म जाता।
या भारतस्य सुनिधिः शतकस्य भाषा,
सा हन्त शुष्यति कथं त्वमुपेक्षसे च ॥८९॥
सन्ध्याग्नि होत्र मुख दैनिक कर्म्म जातं,
सोमादि यज्ञ निवहा हय मेधकान्ताः।

यस्यां च तत्त्व विषयाः सकलाः क्रियाश्च,
साऽभ्युन्नतास्तु शिव ! सर्वगिरां प्रसूतिः ॥९०॥

या कामधेनु रिव सर्व फल प्रदात्री,
या सूर्य वच्च जनताप तमोऽप हन्त्री।
या वैतनोति सुर कल्पलतेव सौख्यं,
सा भारती विजयतां भुवने पुराणी ॥९१॥

ये भारतीं शिवमयीं नु विरोधयन्ते,
ते विश्वनाथ ! तव शूलहता भवन्तु।
याते लयं तु भुवि संस्कृत शत्रु वर्गे,
निर्बाधिता फलतु संस्कृत कल्पवल्ली ॥९२॥

या भारतीय धरणी भवदंघ्रि पद्म—
सम्भूषिता सुरपुरी मधरीचकार ।
निःश्रीकता मुपगता परशासिताऽद्य,
त्वामाह्वय त्यहह ? तां न समीक्ष सेत्वम् ॥९३॥

सुप्तोऽसि कि हिमवतोऽद्य गुहासु तासु,
स्तोत्रार वैः कविकृतैर्बधिरोऽसि किं वा।
यन्नो शृणोसि निज भारत दुःखवार्ता,
नैवोचितं वरद ! जागृहि जागृहि त्वम् ॥९४॥

श्रीकण्ठ ! खण्ड परशो ! परशोक हारिन् !
भ्राजल्ललाट फलक स्खलदंशु भासिन्।
चण्डीपते ! मथित मन्मथ ! दक्षयज्ञ—
प्रध्वंस दक्ष ! भगवन् ! हर साध्वसं नः ॥९५॥

संसार सागर महा विषसर्प दष्ट—
निश्चेष्ट देह सकलावयवाघ राशेः।
त्वत्पाद पद्म शरणागत मन्द बुद्धेः,
को मेऽस्ति रक्षण परोऽत्र प्रभो त्वदन्यः ॥९६॥

 VERIFIED 1985

त्वत्पाद पद्म मकरन्द मिलिन्दितां ये,
प्रापुस्त एवभुवने भवभूति तुल्या ।
विद्या विभूति विमलोज्ज्वलय दिगन्ताः,
दत्ता बभूवु रथमे नच सा सपर्य्या ॥६७॥

कस्मादुपायत अहोऽत्रविभोत्वदीया,
सेवा विधान सरणिर्हृदिमे समीयात् ।
नक्तं दिनं विषय वासनया नितान्तं,
व्यासक्त मानस मयो वद तत्प्रयत्नम् ॥६८॥

रुद्राक्ष माल्य परिवारित सच्चकास—
ल्लेखा त्रयी ललित नीरद नीलकण्ठ ।
श्रीशङ्करेति जपतोमम चित्तवृत्तिः,
शश्वत्त्वदीय चरणं शरणे विधत्ताम् ॥६९॥

तत्त्वं प्रसीद मयि तेऽस्तु नमः सहस्रं,
सर्वज्ञ शर्व शिव शङ्कर चन्द्र मौले ।
अन्ते पुनः सप्रणवं तव सिद्ध मन्त्रं,
भक्त्याहमत्र कथयामि नमःशिवाय ॥७०॥

Q2:4846
N58

एतत्समाप्य शतकं प्रणिपत्य पादं,
शम्भो त्वदीय नुतिवर्णन लब्धवर्णम् ।
भक्त्याऽर्पये तव पदाम्बुजयो रशेषं
प्रीत्या गृहाण सुमुखो भव विश्वनाथ ! ॥७१॥

नग नव नव चन्द्रे वैक्रमेऽब्दे वसन्ते,
मधुग-बहुल पक्षे भौम वारे च षष्ठ्याम् ।
सरस-सरल-पद्यैर्भक्ति बद्धैः प्रणीतं,
स्तवक शतक मेतत्पूर्ति मेतं शिवस्य ॥७२॥

श्री बालकृष्ण कविना गढ़देशजेन,
प्रोक्तं शिवस्य शतकं तदिदं मनोज्ञम् ।

प्रातः सदा पठतियो मनुजोऽत्र भक्त्या,
दूरं निरस्य दुरितान् लभते स सद्म ॥१०॥

०, दरीन केशरी, श्रीबालकृष्ण भट्ट शास्त्रि, साहित्याचार्य
ोवसत्तयक शतकमिदं पूतिमितम् । ॐ तत्सत् शिवमिति ॥

आचार्य श्रीभट्टबालकृष्ण भट्ट शास्त्रि कृत—

श्री केदारनाथाष्टकम्

ील कण्ठाय दयामयाय नागेन्द्र हाराय जटाधराय ।
त्त हस्ताय महेश्वराय केदारनाथाय नमः शिवाय ॥१॥
राधार्चित विग्रहाय भवाय भीमाय भयापहाय ।
पाय शुद्धाय निरञ्जनाय केदारनाथाय नमः शिवाय ॥२॥
र्याय वार्याय कपर्दिने च मृडाय रुद्राय च शङ्कराय ।
क्षयायेन्दु लसन्मुखाय केदारनाथाय नमः शिवाय ॥३॥
धिदेवाय शुभप्रदाय ज्योतिर्मयाय त्रिगुणाधिपाय ।
गर्वातीशाय सदाशिवाय केदारनाथाय नमः शिवाय ॥४॥
भयाय त्रिपुरेश्वराय सुदिव्य लिङ्गाय महाम्रखाय ।
न्धर्व विद्याधर संस्तुताय केदारनाथाय नमः शिवाय ॥५॥
लोचनाय स्वजनप्रियाय मन्दाकिनीतीर कृताश्रयाय ।
कैलास नाथाय दिगम्बराय केदारनाथाय नमः शिवाय ॥६॥
भाङ्गरागाय वृषध्वजाय हिमाद्रि शृङ्ग स्फुरित प्रभाय ।
नन्दीश्वराय प्रमथाधिपाय केदारनाथाय नमः शिवाय ॥७॥
स्मरान्तकाय त्रिपुरान्तकाय कालान्तकाय प्रलयङ्कराय ।
हराय शर्व्वाय भवाधिपाय केदारनाथाय नमः शिवाय ॥८॥

—:o:—

(१) पूजा पद्धति—(द्वितीय बार) गणेशादि स
मू० १॥) (२) कर्मकाण्ड-संकार पद्ध
टिप्पणीयुक्त मू० ३) (३) पितृकर्मपद्धति—सब तरह के
कर्म विद्वत्ता से लिखे गए हैं, मू० ४) (४) देवी पूजा पद्धति
देवीपूजा, हवन, दुर्गा सप्तशती पाठ आदि मू०
(५) गढ़वाल जाति प्रकाश—गढ़वाली जातियों का
से बड़ा उत्तम ग्रन्थ मू० ३॥) (६) अनुवाद दीपिका—संस्
पढ़ने वालों के लिए अत्युत्तम, परीक्षा में भी निर्धारित है
१॥) (७) काव्य प्रबन्ध—संस्कृत साहित्य परीक्षार्थियों के
काम की चीज है मू० १॥) (८) जगदम्बाशतक—अर्थात्
शतक भाषा टीका सहित खण्ड काव्य, मू० ॥) (९) शिवशत
(स्तुति काव्य) मू० ॥) (१०) व्रतार्चन कथाविधि—(साल भर
सब व्रत, पूजा, कथादि सहित) छप रहा है। (१
साहित्य कल्पकलिका—(प्रेस में) (१२) बाल प्र
वाटिका—प्रेस में (१३) महाकवि कालिदास और गढ़
के प्राचीन देवी पीठ—(यन्त्रस्थ) (१४) सदाचार चन्द्रिका-
मू० १॥) (१५) शान्तिपद्धति दान चन्द्रिका मू० २) (१६
आत्मदर्शन काव्य। (१७) नव्य-भारत—(संस्कृत नाटक) प्रे
में (१८) कनक वंश प्र० भाग भाषा सहित ३) (१९
कनक वंश द्वि० भाग सभाषा २॥) (२०) स्वतन्त्र भारत पू
पीठिका भाषा सहित १॥) (२१) जातक दीपिका भाषा स०
२॥) (२२) ताजिक चन्द्रिका भाषा स० १।) (२३) तपोवन
शतक सटीक १)। पता—मैनेजर, बाल पुस्तकालय, जाखोली
पो० जाखखाल भरदार, (टिहरी गढ़वाल) उ० प्र०

